**आद्यमाषक** पु० माष्यतेऽनेन करणे घञ् कर्म्म० । पञ्चगुञ्जापरिमाणे, (माषा) इति ख्याते "माषकः सप्त कृष्णला" इत्युक्तेराद्यत्वविशेषणम् तस्य कार्य्यविशेषोपयोगितया गौणत्वान्न मुख्यत्वम् अतएव "दशार्द्धगुञ्जं प्रवदन्ति माषमिति" भास्कराचार्य्येण माषस्य पञ्चगुञ्जात्मकत्वमेवोक्तम् ।

**आद्यवीज** न० कर्म्म० । मूलकारणे आदिकारणे, १ईश्वरे सांख्यमते २प्रधाने च ।

**आद्या** स्त्री आदौ भवा दिगा० यत् । १दुर्गायां तन्त्रोक्तायां युगभेदे २सुन्दर्य्यादौ च "सत्ये तु सुन्दरी आद्या, त्रेतायां भुवनेश्वरी, द्वापरे तारिणी आद्या कलौ काली प्रकीर्त्तिता" मुण्डमालातन्त्रोक्तेस्तासां तथात्वम्" । आदिभवायां तिथ्यादौ च । "युगाद्या वर्षवृद्धिश्चेति" ति० त० पुरा० ।

**आद्याकाली** स्त्री नित्यस० संज्ञात्वान्न पुंवत् । "कालसंग्रसनात् काली सर्वेषामादिरूपिणी । कालत्वादादिभूतत्वात् आद्याकालीति गीयते" निर्वाणतन्त्रोक्तायां परमप्रकृतौ

**आद्यादि** पु० आदिराद्यो यस्य । पञ्चम्याः स्थाने तसिप्रत्ययनिमित्ते का० वा० उक्ते शब्दगणभेदे । स च आदि, मध्य, अन्त, पृष्ठ, पार्श्व, आकृतिगणः तेन "स्वरतो वर्णतो वेति" सिद्धम् ।

**आद्युदात्त** त्रि० आदिः उदात्तो यस्य । यस्य आदिरुदात्तः तादृशे प्रत्ययादौ । स च पाणिन्यादिभिर्दर्शितः "प्रत्ययः" इत्यधिकारे "आद्युदत्तः" पा० असति अपवादे सर्वोऽपि प्रत्यय आद्युदात्तः । कर्त्तव्यम् तेति उदात्तः । "स्वपादिर्हिंसानामच्यनिटि" पा० अदाद्यन्तर्गणस्वपादेर्हिंसस्तेश्च अनिटि अजादौ लसार्वधातुके परे आदिरुदात्तो वा । स्वपन्ति इत्यत्र स्वेत्यस्य वा उदात्तता । "अभ्यस्तानामादिः" पा० पूर्व्वोक्तविषये अभ्यस्तसंज्ञकानामादिरुदात्तः । दधति, इत्यादौ देत्यस्योदात्तता "अनुदात्ते च" पा० अविद्यमानोदात्ते ल सर्वधातुके परे अभ्यस्तानामादिरुदात्तः । दधासि अनजादावपि देत्यस्योदात्तता "आदिर्णमुल्यन्यतरस्याम्" पा० अभ्यस्तानामादिर्णमुलि परे उदात्तो वा । लोलूयं लोलूयम् पक्षे लित्स्वरः । "अचः कर्त्तृयकि" पा० कर्म्मकर्त्तरि यकि परे उपदेशेऽजन्तानामादिरुदात्तो वा । लूयते केदारः स्वयमेव । "सर्वस्य सुपि" पा० सुपि परे सर्वशब्दस्य आदिरुदात्तः सर्वे अत्र सेत्यस्योदत्तता । "ञ्नित्यादिर्नित्यम्" पा० ञिदन्तस्य निदन्तस्यादिरुदात्तः । ष्यञो ञित्त्वात् तदन्तस्यादिरुदात्तः "पथिमथोः सर्वनामस्थाने" पा० अनयोरादिरुदात्तः सर्वनामस्थाने परे । पन्थाः पेत्युदात्तः । "चयोनिवासे" पा० निवासार्थे चयस्यादिरुदात्तः । "जयः करणम्" पा० करणवाची जयशब्द आद्युदात्तः । "वृषादीनाञ्च" पा० एषामादिरुदात्तः ! वृष जन ज्वर ग्रह हय गय नय ताय तय चय अम वेद सूद अंश गुहा (शमरणौ संज्ञायाम्) (संमतौ भावकर्म्मणोः)। मन्त्र शान्ति काम याम तारा धारा कारा वह कल्प पाद । "आकृतिगणत्वात् अविहितलक्षणमाद्युदात्तत्वं वृषादिषु ज्ञेयम्" सि० कौ० । "संज्ञायामुपमानम्" पा० चञ्चेव चञ्चा । "निष्ठा च द्व्यजनात्" पा० निष्ठान्तस्य द्व्यचः संज्ञायामादिरुदात्तः नत्वाकारान्तः । दत्तः । आकारस्तु स्नातः । "शुष्कधृष्टौ" पा० एतावाद्युदात्तौ असंज्ञायाम् "आशितः कर्त्ता" पा० कर्त्तृवाची आशितशब्द आद्युदात्तः "रिक्ते विभाषा" पा० रिक्तस्यादिरुदात्तः असंज्ञायाम् । "जुष्टार्पिते च छन्दसि" पा० एतौ आद्युदात्तौ असंज्ञायाम् "युष्मदस्मदोर्ङसि" पा० अनयोः ङसि परे आदिरुदात्तः । "ङयि च" पा० अनयोर्ङयि परे आदिरुदात्तः । "यतोऽनावः" पा० यत्प्रत्ययान्तस्य द्व्यच आदिरुदात्तः नावं विना । गव्यम् काम्या । "ईडवन्दवृशंसदुहां ण्यतः" पा० ण्यदन्तानामेषामादिरुदात्तः । "विभाषा वेण्विन्धानयोः" पा० एतयोरादिरुदात्तः । "त्यागरागहासकुहश्वठक्रथानाम्" पा० एषाम् आदिरुदात्तः । फिट्सूत्रे शान्तनवाचार्य्यैरन्येऽपि आद्युदात्ता उक्ता यथा "दक्षिणस्य साधौ" फि० स्वाङ्गाद्यैकदक्षिणशब्दस्यादिरुदात्तो वा दक्षिणोबाहुः "छन्दसि च" फि० "शुक्लगौरयोरादिः" फि० "अनयोरादिरुदात्तः "अङ्गुष्ठोदकवकवशानां छन्दस्यन्तः" फि० लोके तु आदिरुदात्तः । "अथादिः प्राक् शकटेः" फि० २पादे १सू० । अधिकारोऽयम् शकटिशकट्योरिति यावत् । "ह्रस्वान्तस्य स्त्रीविषयस्य२" । आदिरुदात्तः स्यात् । वलिः तनुः । "नब्विषयस्यानिसन्तस्य" ३। वनं वयः । इसन्तस्य तु सर्पिः । नपु नपुंसकम् । "तृणधान्यानां च द्व्यषाम्" ४। द्व्यचामित्यर्थः । कुशाः, काशाः, माषाः, तिला, बह्वचान्तु गोधूमाः । "न्नः संख्यायाः" ५ । पञ्च, चतस्रः । "स्वाङ्गशिटामदन्तानाम्" ६ । शिट् सर्व्वनाम, "कर्णाभ्यां चुचुकादधि" "ओष्ठाविव मधु" "विश्वो विहायाः" । "प्राणिनां कुपूर्वम्" ७। कवर्गात् पूर्व्व आदिरुदात्तः । काकः, वृकः, "शुकेषु मे" । प्राणिनां किम्, "क्षीरसर्पिर्मधूदकम्" । "खय्युवर्णं कृत्रिमाख्या चेत्" ८। खयि परे उवर्णमुदात्तं स्यात्, कन्दूकः, "उनर्व्वन्नन्तानाम्" ९ । उन । "वरुणं वोऽरि-